# Ganesha Stuti by Panchadevas

# ગણેશસ્તુતિઃ પઞ્ચદેવૈઃ કૃતા

## Document Information

Text title : Ganesha Stuti by Panchadevas

File name : gaNeshastutiHpanchadevaiHkRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 11

Latest update : August 22, 2020

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# ગણેશસ્તુતિઃ પઞ્ચદેવૈઃ કૃતા

શ્રીગણેશાય નમઃ ।
પઞ્ચદેવા ઊચુઃ ॥

નમસ્તે વિઘ્નરાજાય ભક્તાનાં વિઘ્નહારિણે ।
વિઘ્નકર્ત્રે હ્યભક્તાનાં ગણેશાય નમો નમઃ ॥ ૨૬॥

હેરંબાય નમસ્તુભ્યં ઢુણ્ઢિરાજાય તે નમઃ ।
વિનાયકાય દેવાય બ્રહ્મણાં નાયકાય ચ ॥ ૨૭॥

લમ્બોદરાય સિદ્ધેશ ગજાનનધરાય ચ ।
શૂર્પકર્ણાય ગૂઢાય ચતુર્હસ્ત નમોઽસ્તુ તે ॥ ૨૮॥

લમ્બોષ્ઠાયૈકદન્તાય સર્વેશાય ગણાધિપ ।
અનન્તમહિમાધાર ધરણીધર તે નમઃ ॥ ૨૯॥

નમો માયામયાયૈવ માયાહીનાય તે નમઃ ।
મોહદાય નમસ્તુભ્યં મોહહન્ત્રે નમો નમઃ ॥ ૩૦॥

પઞ્ચભૂતમયાયૈવ પઞ્ચભૂતધરાય ચ ।
ઇન્દ્રિયાણાં ચાધિપાયેન્દ્રિયજ્ઞાનપ્રકારિણે ॥ ૩૧॥

અધ્યાત્મનેઽધિભૂતાયાધિદૈવાય ચ તે નમઃ ।
અન્નાયાન્નપતે તુભ્યમન્નાન્નાય નમો નમઃ ॥ ૩૨॥

પ્રાણાય પ્રાણનાથાય પ્રાણાનાં પ્રાણરૂપિણે ।
ચિત્તાય ચિત્તહીનાય ચિત્તેભ્યશ્ચિત્તદાયિને ॥ ૩૩॥

વિજ્ઞાનાય ચ વિજ્ઞાનપતયે દ્વન્દ્વધારિણે ।
વિજ્ઞાનેભ્યઃ સ્વવિજ્ઞાનદાયિને તે નમો નમઃ ॥ ૩૪॥

આનન્દાય નમસ્તુભ્યમાનન્દપતયે નમઃ ।
આનન્દાનન્દદાત્રે ચ કારણાય નમો નમઃ ॥ ૩૫॥

ચૈતન્યાય ચ યત્નાય ચેતનાધારિણે નમઃ ।
ચૈતન્યેભ્યઃ સ્વચૈતન્યદાયિને નાદરૂપિણે ॥ ૩૬॥

બિન્દુમાત્રાય બિન્દૂનાં પતયે પ્રાકૃતાય ચ ।
ભેદાભેદમયાયૈવ જ્યોતીરૂપાય તે નમઃ ॥ ૩૭॥

સોઽહંમાત્રાય શૂન્યાય શુન્યાધારાય દેહિને ।
શૂન્યાનાં શૂન્યરૂપાય પુરુષાય નમો નમઃ ॥ ૩૮॥

જ્ઞાનાય બોધનાથાય બોધાનાં બોધકારિણે ।
મનોવાણીવિહીનાય સર્વાત્મક નમો નમઃ ॥ ૩૯॥

વિદેહાય નમસ્તુભ્યં વિદેહાધારકાય ચ ।
વિદેહાનાં વિદેહાય સાઙ્ખ્યરૂપાય તે નમઃ ॥ ૪૦॥

નાનાભેદધરાયૈવ ચૈકાનેકાદિમૂર્તયે ।
અસત્સ્વાનન્દરૂપાય શક્તિરૂપાય તે નમઃ ॥ ૪૧॥

અમૃતાય સદાખણ્ડભેદાભેદવિવર્જિત ।
સદાત્મરૂપિણે સૂર્યરૂપાધારાય તે નમઃ ॥ ૪૨॥

સત્યાસત્યવિહીનાય સમસ્વાનન્દમૂર્તયે ।
આનન્દાનન્દકન્દાય વિષ્ણવે તે નમો નમઃ ॥ ૪૩॥

અવ્યક્તાય પરેશાય નેતિનેતિમયાય ચ ।
શિવાય શાશ્વતાયૈવ મોહહીનાય તે નમઃ ॥ ૪૪॥

સંયોગેન ચ સર્વત્ર સમાધૌ રૂપધારિણે ।
સ્વાનન્દાય નમસ્તુભ્યં મૌનભાવપ્રદાયિને ॥ ૪૫॥

અયોગાય નમસ્તુભ્યં નિરાલમ્બસ્વરૂપિણે ।
માયાહીનાય દેવાય નમસ્તે હ્યસમાધયે ॥ ૪૬॥

શાન્તિદાય નમસ્તુભ્યં પૂર્ણશાન્તિપ્રદાય તે ।
યોગાનાં પતયે ચૈવ યોગરૂપાય તે નમઃ ॥ ૪૭॥

ગણેશાય પરેશાય હ્યપારગુણકીર્તયે ।
યોગશાન્તિપ્રદાત્રે ચ મહાયોગાય તે નમઃ ॥ ૪૮॥

ગુણાન્તં ન યયુર્યસ્ય વેદાદ્યા વેદકારકાઃ ।
સ કસ્ય સ્તવનીયઃ સ્યાદ્યથામતિ તથા સ્તુતઃ ॥ ૪૯॥

તેન વૈ ભગવાન્ સાક્ષાચ્ચિન્તામણિગજાનનઃ ।
પ્રસન્નો ભવતુ ત્રાતાઽસ્માકં ત્વં પરમા ગતિઃ ॥ ૫૦॥

ઇત્યેવમુક્ત્વા દેવેશાસ્તૂષ્ણીં ભૂતાસ્તથા શિવે ।
ગણેશોઽપિ પ્રસન્નાત્મા હૃષ્ટઃ સન્ પ્રત્યુવાચ તાન્ ॥ ૫૧॥

શ્રીગણેશ ઉવાચ ।
પઞ્ચદેવા મહાભાગાઃ પ્રસન્નો ભવતાં સ્તવૈઃ ।
તપસા ચ તથા ભક્ત્યા વાઞ્છિતં બ્રૂત વૈ વરમ્ ॥ ૫૨॥

ભવત્કૃતમિદં સ્તોત્રં પરમાહ્લાદવર્ધનમ્ ।
મમ પ્રીતિકરં ભક્ત્યા સર્વદં પ્રભવિષ્યતિ ॥ ૫૩॥

યઃ પઠેદ્ભાવપૂર્વં સ ધર્મકામાર્થમોક્ષભાક્ ।
પુત્રપૌત્રયુતઃ શ્રીમાનન્તે સ્વાનન્દમાપ્નુયાત્ ॥ ૫૪॥

સપ્તવારં પઠેન્નિત્યમેકવિંશતિવાસરમ્ ।
કારાગૃહગતો વાઽપિ મુચ્યતે બન્ધનાત્ સ્વયમ્ ॥ ૫૫॥

એકકાલં દ્વિકાલં વા ત્રિકાલમપિ યઃ પઠેત્ ।
સ વૈ દેવાદિકૈર્વન્દ્યો ભવિષ્યતિ ન સંશયઃ ॥ ૫૬॥

મારણોચ્ચાટનાદિભ્ય એકવિંશતિવારતઃ ।
તાવદ્દિનાનિ પાઠેન તસ્ય નૈવ ભયં ભવેત્ ॥ ૫૭॥

ધનધાન્યાદિકં સર્વમારોગ્યં પશુવર્ધનમ્ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૫૮॥

ઇતિ પઞ્ચદેવૈઃ કૃતા ગણેશસ્તુતિઃ । ૧.૧૧

---

*Ganesha Stuti by Panchadevas*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*